नामा सरुग्बन्धूनामुपकारकृद्द्विरूपितस्त्यक्तस्तु तैः सप्तमे ७। पृथुलनयनवक्षावृत्तजङ्घोरुजानुर्जनकगुरुवियुक्तः शैशवे व्याधितश्च। नरपतिकुलपूज्यः पिङ्गलः क्रूरचेष्टो झषकुलिशखगाङ्कच्छन्नपापोऽलिजातः ८। व्यादीर्घास्यशिरोधरः पितृधनत्यागी कविर्वीर्यवान् वक्ता स्थूलरदश्रवोऽधरनसः कर्मोद्यतः शिल्पवित्। कुब्जांसः कुनखी समांसलभुजः प्रागल्भ्यवान् धर्मविद्बन्धुद्विट् न बलात् समेति च वशं साम्नैकसाध्योऽश्वजः ९। नित्यं लालयति स्वदारतनयान् धर्मध्वजोऽधःकृशः स्वक्षः क्षामकटिर्गृहीतवचनः सौभाग्ययुक्तोऽलसः। शीतालुर्मनुजोऽटनश्च मकरे १० सत्त्वाधिकः काव्यकृल्लुब्धो गम्यजराङ्गनासु निरतः संत्यक्तलज्जोऽघृणश्च। करभगलशिरालुः खरलोमशदीर्घतनुः पृथुचरणोरुपृष्ठजघनास्यकटीजठरः। परवनितार्थपापनिरतः क्षयवृद्धियुतः प्रियकुसुमानुलेपनसुहृत् घटजो ११ऽध्वसहः। परजनधनभोक्ता दारवासोऽनुरक्तः समरुचिरशरीरस्तुङ्गनासो बृहत्कः। अभिभवति सपत्नान् स्त्रीजितश्चारुदृष्टिर्द्युतिनिधिधनभोगी पण्डितश्चान्त्यराशौ १२। बलवति राशौ तदधिपतौ च स्वबलयुतः स्याद्यदि तु हिमांशुः। कथितफलानामतिकलदाता शशिवदतोऽन्ये त्वनुपरिचिन्त्याः"।

सूर्य्यादिग्रहस्थितराशिफलम् तत्रैव १८अ० उक्तं यथा

"प्रथितश्चतुरोऽटनोऽल्पवित्तः क्रियगे १ त्वायुधभृद्वितुङ्गभागे। गवि २ वस्त्रसुगन्धपण्यजीवी वनिताद्विट् कुशलश्च गेयवाद्ये। विद्याज्योतिषवित्तवान् मिथुनगे ३ भानौ कुलीरे ४ स्थिते तीक्ष्णोऽस्वः परकार्य्यकृच्छ्रमपरः क्लेशैश्च संयुज्यते। सिंहस्थे ५ वनशैलगोकुलरतिर्वीर्यान्वितोऽज्ञः पुमान्, कन्यास्थे ६ लिपिलेख्यकाव्यगणितज्ञानान्वितः स्त्रीवपुः। जातस्तौलिनि ७ शौण्डिकोऽध्वनिरतो हैरण्यको नीचकृत् क्रूरः साहसिको विषार्जितधनः शस्त्रान्तगोऽलि८स्थिते। सत्पूज्यो धनवान् धनुर्द्धरगते ९ तीक्ष्णो भिषक्कारुको नीचोऽज्ञः कुवणिङ् मृगे १०ऽल्पधनवाँल्लुब्धोऽन्यभाग्ये रतः। नीचो घटे ११ तनयभाग्यपरिच्युतोऽस्वस्तोयोत्थपण्यविभवो वनिताहतोऽन्त्ये १२। सू०। नक्षत्रमानवतनुप्रतिमे विभागे लक्ष्मादिशेत्तुहिनरश्मिदिनेशयुक्ते। नरपतिसत्कृतोऽटनश्चमूपवणिक्सधनाः क्षततनुचोरभूरिविषयांश्च कुजः स्वगृहे १।८। युवतिजितान् सुहृत्सु विषमान् परदाररतान् कुहकसुवेषभीरुपरुषान् सितभे २।७ जनयेत्। बौधे ३।६ऽसहस्तनयवान् विसुहृत् कृतघ्नो गान्धर्वयुद्धकुशलः कृपणोऽभयोऽर्थी। चान्द्रे ४ऽर्थवान् सलिलयानसमर्जितस्वः प्राज्ञश्च भूमितनये विकलः खलश्च। निस्वः क्लेशसहो वनान्तरचरः सिंहे ५ऽल्पदारात्मजो जैवे ९।१२ऽनैकरिपुर्नरेन्द्रसचिवः ख्यातोऽभयोऽल्पात्मजः। दुःखार्तो विधनोऽटनोऽनृतरतस्तीक्ष्णश्च कुम्भ ११ स्थिते भौमे भूरिधनात्मजो मृग १० गते भूपोऽथवा तत्समः। म०। द्यूतर्णपानरतनास्तिकचौरनिःस्वाः कुस्त्रीककूटकृदसत्यरताः कुजर्क्षे १।८। आचार्य्यभूरिसुतदारधनार्जनेष्टाः शौक्रे २।७ वदान्यगुरुभक्तिरताश्च सौम्ये। विकत्थनः शास्त्रकलाविदग्धः प्रियंवदः सौख्यरतस्तृतीये ३ जलार्जितस्वः स्वजनस्य शत्रुः शशाङ्कजे शीतकरर्क्ष४युक्ते। स्त्रीद्वेष्यो विधनसुखात्मजोऽटनोऽज्ञः स्त्रीलोलः सुपरिभवोऽर्क५राशिगे ज्ञे। त्यागी ज्ञः प्रचुरगुणः सुखी क्षमावान् युक्तिज्ञो विगतभयश्च षष्ठराशौ ६। परकर्मकृदस्वः शिल्पबुद्धिर्ऋणवान् विष्टिकरो बुधेऽर्कजर्क्षे १०।११। नृपसत्कृतपण्डिताप्तवाक्यो नवमे ९।१२ऽन्त्ये जितसेवकोऽन्त्यशिल्पः" बु०। सेनानीर्बहुवित्तदारतनयो दाता सुभृत्यः क्षमी तेजोदारगुणान्वितः सुरगुरौ ख्यातः पुमान् कौजभे १।८। कल्याङ्गः ससुखोऽर्थमित्रतनयस्त्यागी प्रियः शौक्रभे २।७। बौधे ३।६ भूरिपरिच्छदात्मजसुहृत्साचिव्ययुक्तः सुखी। चान्द्रे ४ रत्नसुतस्वदारविभवः प्रज्ञासुखैरन्वितः सिंहे स्याद् बलनायकः सुरगुरौ प्रोक्तञ्च यच्चन्द्रभे। स्वर्क्षे ९ १२ माण्डलिको नरेन्द्रसचिवः सेनापतिर्वा धनी कुम्भे ११ कर्कटवत् फलानि मकरे १० नीचोऽल्पवित्तोऽसुखी। वृ०। परयुवतिरतस्तदर्थवादैर्हृतविभवः कुलपांसनः कुजर्क्षे १।८। स्वबलमतिधनो नरेन्द्रपूज्यः स्वजनविभुः प्रथितोऽभयः सिते स्वे २।७। नृपकृत्यकरोऽर्थवान् कलाविन्मिथुने ३ षष्ठगते ६ऽतिनीचकर्मा। रविजर्क्षे १०।११ गतेऽमरारिपूज्ये सुभगः स्त्रीविजितो रतः कुनार्य्याम्। द्विभार्य्योऽर्थी भीरुः प्रबलमदशोकश्च शशिभे ४ हरौ योषाप्तार्थः प्रवरयुवतिर्मन्दतनयः। गुणैः पूज्यः सस्वस्तुरग ९ सहिते दानवगुरौ झषे १२ विद्वानाढ्यो नृपजनितपूजोऽतिसुभगः। शु०। मूर्खोऽटनः कपटवान् विसुहृद्यमेऽजे १ कीटे ८ तु बन्धवधभाक् चपलोऽघृणश्च। निर्ह्रीसुखार्थतनयः स्खलितश्च लेख्ये रक्षापतिर्भवति मुख्यपतिश्च बौधे ३।६। वर्ज्यस्त्रीष्टोऽनबहुविभवो भूरिभार्य्यो वृषस्थे २ ख्यातः स्वोच्चे ७ गणपुरबलग्रामपूज्योऽर्थवांश्च। ४कर्किण्यस्वो-